শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে চতুঃপঞ্চাশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে চতুঃপঞ্চাশং দশকম্ ॥

## কালিযমর্দনে গোগোপানামুজ্জীৱনৱর্ণনম্

ৎৱৎসেৱোৎকস্সৌভরির্নাম পূর্ৱং
    কালিন্দ্যন্তর্দ্ৱাদশাব্দং তপস্যন্।
মীনৱ্রাতে স্নেহৱান্ ভোগলোলে
    তার্ক্ষ্যং সাক্ষাদৈক্ষতাগ্রে কদাচিৎ ॥ 54.1 ॥

ৎৱদ্ৱাহং তং সক্ষুধং তৃক্ষসূনুং
    মীনং কঞ্চিজ্জক্ষতং লক্ষযন্ সঃ।
তপ্তশ্চিত্তে শপ্তৱানত্র চেৎ ৎৱং
    জন্তূন্ ভোক্তা জীৱিতং চাপি মোক্তা ॥ 54.2 ॥

তস্মিন্ কালে কালিযঃ ক্ষ্ৱেলদর্পাৎ
    সর্পারাতেঃ কল্পিতং ভাগমশ্নন্।
তেন ক্রোধাৎ ৎৱৎপদাম্ভোজভাজা
    পক্ষক্ষিপ্তস্তদ্দুরাপং পযোঽগাৎ ॥ 54.3 ॥

ঘোরে তস্মিন্ সূরজানীরৱাসে
    তীরে ৱৃক্ষা ৱিক্ষতাঃ ক্ষ্ৱেলৱেগাৎ।
পক্ষিৱ্রাতাঃ পেতুরভ্রে পতন্তঃ
    কারুণ্যার্দ্রং ৎৱন্মনস্তেন জাতম্ ॥ 54.4 ॥

কালে তস্মিন্নেকদা সীরপাণিং
    মুক্ত্ৱা যাতে যামুনং কাননান্তম্।

ৎৱয্যুদ্দামগ্রীষ্মভীষ্মোষ্মতপ্তা
    গোগোপালা ৱ্যাপিবন্ ক্ষ্ৱেলতোযম্॥ **54.5** ॥

নশ্যজ্জীৱান্ ৱিচ্যুতান্ ক্ষ্মাতলে তান্
    ৱিশ্ৱান্ পশ্যন্নচ্যুত ৎৱং দযার্দ্রঃ।
প্রাপ্যোপান্তং জীৱযামাসিথ দ্রাক্
    পীযূষাম্ভোৱর্ষিভিঃ শ্রীকটাক্ষৈঃ॥ **54.6** ॥

কিং কিং জাতো হর্ষৱর্ষাতিরেকঃ
    সর্ৱাঙ্গেষ্ৱিত্যুত্থিতা গোপসঙ্ঘাঃ।
দৃষ্টৱাঽগ্রে ৎৱাং ৎৱৎকৃতং তদ্ৱিদন্ত -
    স্ত্ৱামালিঙ্গন্ দৃষ্টনানাপ্রভাৱাঃ॥ **54.7** ॥

গাৱশ্চৈৱং লব্ধজীৱাঃ ক্ষণেন
    স্ফীতানন্দাস্ত্ৱাং চ দৃষ্টৱা পুরস্তাৎ।
দ্রাগাৱৱ্রুঃ সর্ৱতো হর্ষবাষ্পং
    ৱ্যামুঞ্চন্ত্যো মন্দমুদ্যন্নিনাদাঃ॥ **54.8** ॥

রোমাঞ্চোঽযং সর্ৱতো নঃ শরীরে
    ভূযস্যন্তঃ কাচিদানন্দমূর্ছা।
আশ্চর্যোঽযং ক্ষ্ৱেলৱেগো মুকুন্দে -
    ত্যুক্তো গোপৈর্নন্দিতো ৱন্দিতোঽভূঃ॥ **54.9** ॥

এৱং ভক্তান্ মুক্তজীৱানপি ৎৱং
    মুগ্ধাপাঙ্গৈরস্তরোগাংস্তনোষি।
তাদৃগ্ভূতস্ফীতকারুণ্যভূমা
    রোগাৎ পাযা ৱাযুগেহাধিৱাস॥ **54.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে চতুঃপঞ্চাশং দশকং সমাপ্তম্॥